# ॥ व्यासाष्टकम् ॥

नमो ज्ञानानलशिखापुञ्जपिङ्गजटाभृते।
कृष्णायाकृष्णमहसे कृष्णद्वैपायनाय ते॥ १ ॥

नमस्तेजोमयश्मश्रुप्रभाशबलितत्विषे।
वक्त्रवागीश्वरीपद्मरजसेवोदितश्रिये ॥ २ ॥

नमः सन्ध्यासमाधाननिष्पीतरवितेजसे।
त्रैलोक्यतिमिरोच्छेददीपप्रतिमचक्षुषे ॥ ३ ॥

नमः सहस्रशाखाय धर्मोपवनशाखिने।
सत्त्वप्रतिष्ठापुष्पाय निर्वाणफलशालिने॥ ४ ॥

नमः कृष्णाजिनजुषे बोधनन्दनवासिने।
व्याप्तायेवालिजालेन पुण्यसौरभलिप्सया॥ ५ ॥

नमः शशिकलाकारब्रह्मसूत्रांशुशोभिने।
श्रिताय हंसकान्त्येव सम्पर्कात् कमलौकसः॥ ६ ॥

नमो विद्यानदीपूर्णशास्त्राब्धिसकलेन्दवे।
पीयूषरससाराय कविव्यापारवेधसे॥ ७ ॥

नमः सत्यनिवासाय स्वविकाशविलासिने।
व्यासाय धाम्ने तपसां संसारायासहारिणे॥ ८ ॥

॥ इति काश्मीरिकेण क्षेमेन्द्रकविना कृतायां भारतमञ्जर्याम् उपसंहारे पठितं व्यासाष्टकं सम्पूर्णम् ॥

This stotra can be accessed in multiple scripts at:

http://stotrasamhita.net/wiki/Vyasashtakam.

generated on **August 23, 2026**

Downloaded from http://stotrasamhita.github.io | StotraSamhita | Credits